रोल नं० [ ][ ][ ][ ][ ][ ][ ][ ]

मुद्रित पृष्ठों की संख्या : 6

105

405 (IAF)

2014

# संस्कृतम्

समय : 3 घण्टे ] [ पूर्णांक : 100

## खण्ड – 'क' (अपठितांश – अवबोधनम्)

1. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत। (निम्नलिखित गद्यांश को पढ़कर प्रश्नों के उत्तर लिखिए):
धन्यः अयं भारतदेशः, यत्र समये–समये स्वनामधन्याः बहवः महापुरुषाः समुत्पन्नाः। एते महापुरुषाः स्वकीयं समग्रजीवनं राष्ट्रसेवायां समर्पयामासुः। एतेषु प्रातः वन्दनीयेषु गुरुकुल–कांगड़ी–विश्वविद्यालय–संस्थापकस्य स्वामिश्रद्धानन्दस्य स्थानम् उत्कृष्टतमं वर्तते। यौवने विषय वासनापङ्के निमग्नोऽपि मुंशीरामः तीव्रतपसा, साधनया श्रद्धया च बभूव महात्मा मुंशीरामः तदनु स्वामिश्रद्धानन्द सरस्वती इतिनाम्ना जगति विश्रुतः जातः। तस्य स्वामिनः जीवनं चन्द्रमसः कलेव तथा दीप्तिमत् बभूव, यथा सर्वाः दिशः तस्य प्रकाशेन प्रकाशिताः अभवन्।

(क) एकपदेन उत्तरत। (एक पद में उत्तर दीजिए) : ½ ×4 = 2

(i) कः देशः धन्यः अस्ति ?

(ii) स्वकीयं समग्रजीवनं राष्ट्रसेवायां के समर्पयामासुः ?

(iii) गुरूकुल कांगड़ी विश्वविद्यालयस्य संस्थापकस्य किंनाम अस्ति ?

(iv) स्वामिश्रद्धानन्दस्य स्थानम् कीदृशं वर्तते ?

(ख) संस्कृतस्य पूर्णवाक्येन उत्तरत। (संस्कृत के पूर्ण वाक्य में उत्तर दीजिए) : 1×2 = 2

(i) यौवने विषयवासनापङ्के निमग्नोऽपि कः महात्मा मुंशीरामः बभूव ?

(ii) महात्मा मुंशीरामः केन नाम्ना जगति विश्रुतः जातः ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देश के अनुसार प्रश्नों के उत्तर दीजिए) : 1×4 = 4

(i) 'महात्मा मुंशीरामः' अत्र विशेषणपदं किम् ?

(ii) 'तस्य प्रकाशेन प्रकाशिता' इत्यत्र 'तस्य' इति सर्वनाम स्थाने कः संज्ञा प्रयोगः विधेय ?

(iii) 'चन्द्रस्य' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?

(iv) 'प्रसिद्धः' इत्यस्य समानार्थकं पदं गद्यांशात् चित्वा लिखत।

(घ) अस्य गद्यांशस्य समुचितं शीर्षकं लिखत। (इस गद्यांश के लिए समुचित शीर्षक लिखिए)। 2

## खण्ड – 'ख' (संस्कृतेन रचनात्मकं कार्यम्)

2. ग्रीष्मावकाशे प्रवीणः मित्रैः सह भ्रमणाय विकासनगरम् अगच्छत्। ततो निवृत्य सः स्वमातरं संस्मरण पत्रम् अलिखत्। तत् पत्रं मञ्जूषायां प्रदत्तैः शब्दैः पूरयित्वा पुनः उत्तरपुस्तिकायाम् लिखत्।
(गर्मी की छुट्टियों में प्रवीण मित्रों के साथ विकास नगर घूमने गया। वहाँ से लौटकर उसने अपनी माता को संस्मरण पत्र लिखा। उस पत्र को मञ्जूषा में दिए गए शब्दों से पूरा कर पुनः उत्तरपुस्तिका में लिखिये।) : ½ ×10 = 5

| | |
|---|---|
| मञ्जूषा : | मातः!, वन्दे, 25.05.2012, सप्त, ग्रीष्मावकाशे, नगरं, सुरम्यः, प्रवीणः, हिमालयस्य, उत्पादनं |



[ Turn Over

देहरादूनतः (उत्तराखण्ड प्रदेशात्)
दिनांक : (i) ..............................

पूज्या (ii) ..............................
सादरं (iii)..............................

अत्र शुभं तत्रास्तु। अहं (iv)..................भ्रमितुं विकासनगरम् अगच्छम्। इदं नगरं देहरादूनतः (v).......... योजनानि दूरं तिष्ठति। राजमार्गम् उभयतः योजनद्वयम् आयतं (vi).................... अभ्रंलिहाग्रैः भवनैः बहुशः विराजते। तस्य समीपे (vii)................उपत्यकायां यमुना नदी प्रवहति। एतस्यां नद्याम् एकः (viii) .......... सेतुः वर्तते। तस्मात् नातिदूरे खोदरी विद्युत् परियोजना विद्यते। तस्याः प्रतिदिनं 120 मेगावाट विद्युतः (ix) ............... भवति।

भवदीयः
(x) ..............................

3. मंजूषायां प्रदत्त शब्दसूची साहाय्येन अधोदत्तां लघुकथां पूरयित्वा उत्तरपुस्तिकायां पुनः लिखित। ½ ×10 = 5
(मंजूषा में दिये गये शब्दों की सहायता से निम्नलिखित लघुकथा को भरकर उत्तर पुस्तिका में पुनः लिखिए)

कश्चन (i) ................ वार्धक्ये राज्यं पुत्राय समर्प्य एकाकी वनं प्रति प्रस्थितवान्। मार्गे कश्चन तेजस्वी (ii) ................ मिलितः। राजातं विनयेन नमस्कृतवान्। तदासः तेजस्वी अपृच्छत–"राजन्! अद्य एवम् एकाकितया क्व (iii) ................ भवता ?" इति। राजा अवदत् – "महात्मन्! बहवः देशा जिताः। अनेकविधानि (iv) ................ कृतानि। विद्यालयाः चिकित्सालयाः अपि प्रतिष्ठापिताः। किन्तु कुतश्चिदपि मया सुखं न प्राप्तम्। अतः संसारमोहं परित्यज्य (v) ................ वनं गच्छामि।" एतत् श्रुत्वा सः तेजस्वी समीपस्थं निम्बवृक्षं (vi) ........... अवदत् – "महाराज! निम्बवृक्षः तिक्ततामयः। दानेन, पूजया, (vii).........., परिश्रमेण वा किम् इतः मधुरं (viii) ................ प्राप्येत ? संसारः अपि तादृशः एव। तत्र सुखं मृगमरीचिकायते। सा मृगमरीचिका अस्मान् इतस्ततः भ्रामयति। मरणकालः (ix) ................ चेदपि ततः सुखं तु न प्राप्येत एव । सत्कर्मानुष्ठानात् भगवतः (x) ................ च सुखं प्राप्येत न अन्यथा।"

| **मञ्जूषा** : राजा, गम्येत, पुरुषः, दानानि, प्रदर्शयन्, सुखाय, प्रार्थनया, फलं, ध्यानात्, सन्निहितः |
|---|

4. अधोलिखितेषु **एकं विषयम्** अधिकृत्य पञ्चवाक्यमितं एकम् अनुच्छेदं संस्कृतेन लिखत। 1×5 = 5
(किसी **एक विषय** पर पाँच वाक्यों का संस्कृत में एक अनुच्छेद लिखिए।)
(i) भारतीय संस्कृतिः (ii) सत्सङ्गतिः (iii) ममप्रियपुस्तकम्

## खण्ड – 'ग' (अनुप्रयुक्त – व्याकरणम्)

5. अधोलिखितेषु वाक्येषु रेखाङ्कित पदेषु सन्धि–विच्छेदं कुरुत। 1×6 = 6
(निम्नांकित वाक्यों में रेखांकित पदों में सन्धि–विच्छेद कीजिए।)
(i) यान्यस्माकं सुचरितानि (ii) एषा वेदोपनिषद्
(iii) पार्थिवस्यैव तावन् (iv) तद्गुणैः कर्णमागत्य
(v) विभूषणं मौनमपण्डितानाम् (vi) भोजने चामृतं वारि

6. अधोलिखितेषु वाक्येषु रेखाङ्कितपदानां विग्रहा लेखनीयाः। 1×6 = 6
(नीचे लिखे हुए वाक्यों में रेखांकित पदों का विग्रह कीजिये।)
(i) आचार्यदेवो भव (ii) लक्ष्मणः धैर्यसागरः
(iii) त्यागाय संभृतार्थानाम् (iv) मान्धाता च महीपतिः
(v) क्वासौ दशास्यान्तकः (vi) या प्रत्यहं किल तदा मतिमाननीयाम्

7. निम्नलिखितेषु वाक्येषु कोष्ठान्तर्गत प्रकृति प्रत्ययं च योजयित्वा रिक्तस्थानानि पूरयत। 1×8 = 8
(नीचे लिखे हुए वाक्यों में कोष्ठक के अन्तर्गत प्रकृति के साथ निर्दिष्ट प्रत्यय जोड़कर खाली स्थान भरिए।)

(i) सत्यान्न..................(प्र + मद् + तव्यत्)। (ii) अश्वपृष्ठाद् ...................... (अव + तृ + लङ्)।
(iii) वने खलु ...................... (वस् + तव्यत्)। (iv) अवतीर्य च ...................... (स्पृश् + लिट्)।
(v) हस्तेनैव ...................(वि + सृज् + क्त)। (vi) चापलाय ........................... (प्र + चुद् + क्त)
(vii) सहस्रगुणम्...........(उद् + सृज् + तुमुन्)। (viii) पुनर्निपुणं ........................ (निर् + ईक्ष् + शानच्)।

8. अधोलिखितेषु वाक्येषु कर्तृक्रियापदयोः अन्वितिः क्रियताम्। 1×5 = 5
(अधोलिखित वाक्यों में कर्ता और क्रिया की अन्विति कीजिए।)

(i) भार्गवस्याश्रमपदं स ......................................। (ददर्श / ददृशतुः)
(ii) अकालो ............................................. धर्मस्य। (नास्ति / न सन्ति)
(iii) स्नेहत्यागान्न ............................................। (शोच्यन्ते / शोच्यते)
(iv) किमप्यभिमतं ............................................। (मन्ये / मन्यामहे)
(v) कथय कस्त्वम् ? कुत .................................. ? (आयातः / आयाताः)

**अथवा**

अधोलिखितेषु वाक्येषु विशेषणविशेष्ययोः अन्वितिः क्रियताम्।
(नीचे लिखे वाक्यों में विशेष्य–विशेषण की अन्विति कीजिए।)

(i) अपि नैर्गुण्यमस्माकं ............................ नरपतौ त्वया। (वाच्यं / वाच्यः)
(ii) शुल्के ............................................ राज्यम्। (विपणितं / विपणितः)
(iii) क्रमप्राप्ते ...................................... राज्ये। (हृतं / हृते)
(iv) तदन्वये ......................................। (शुद्धिमति / शुद्धिमतः)
(v) शास्त्रं सर्वस्य......................................। (लोचने / लोचनम्)

9. अधोलिखितेषु वाक्येषु कोष्ठान्तर्गतशब्देषु उपपदविभक्तिं प्रयुज्य रिक्तस्थानपूर्तिः क्रियताम्। 1×5 = 5
(नीचे लिखे वाक्यों में कोष्ठक में दिए गये शब्दों के साथ उपपद विभक्ति का प्रयोग करके खाली स्थान भरिए।)

(i) एवमादि त्वया सौम्य ......................... वसुधाधिपः। (विज्ञाप्य)
(ii) शोकादवचनाद् ...................... हस्तेनैव विसर्जितः। (राजा)
(iii) भुवि ................................................................ नृपे। (शोच्यासनम्)
(iv) नोत्सहेश्लाघनीये.................................. वारयितुम्। (कालः)
(v) प्रजानां विनयाधानाद् ........................... भरणादपि। (रक्षणं)

## खण्ड – 'घ' (पठितांश – अवबोधनम् भाग–I)

10. अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत। (नीचे लिखे गद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।) :

राजा च सौधं निर्जनं विधाय वत्सराजं प्राह–त्वया भोजो भुवनेश्वरी–विपिने रात्रौ हन्तव्यः, छिन्नं च तस्य शिरः मत्पार्श्वे अन्तःपुरम् आनेतव्यम्। एतन्निशम्य वत्सराजः उत्थाय नृपं नत्वा प्रावोचत्–यद्यपि देवादेशः प्रमाणम्, पुनरपि किंचिद् वक्तुकामोऽस्मि, सापराधमपि मे वचः क्षन्तव्यम्। देव! पुत्रवधो न कदापि हिताय भवतीति।

(क) एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) : ½ × 2 = 1

(i) सौधं निर्जनं विधाय राजा कं प्राह ? (ii) कः उत्थाय नृपं नत्वा प्रावोचत् ?

(ख) पूर्णवाक्येन उत्तरत। (पूर्ण वाक्य में उत्तर दीजिए।) : 1

राजा कस्मिन् विपिने रात्रौ हन्तुं वत्सराजं प्राह ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देशानुसार प्रश्नों के उत्तर दीजिए।) 1×3 = 3

(i) 'प्राह' इति क्रियापदस्य कर्तृपदं किम् ? (ii) 'हिंसा' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(iii) 'मे वचः क्षन्तव्यम्' अत्र 'मे' सर्वनाम पदं कस्मै प्रयुक्तम् ?

11. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत। (नीचे लिखे नाट्यांश को पढ़कर प्रश्नो के उत्तर दीजिए।)

संन्यासी – कथमस्मान् संन्यासिनोऽपि कठोरभाषणैस्तिरस्करोषि ?

दौवारिकः – भगवन्! संन्यासी तुरीयाश्रमसेवीति प्रणम्यते, परन्तु प्रभूणामाज्ञामुल्लंघ्य निजपरिचय-मददत्वाऽऽयातीत्याक्रुश्यते।

संन्यासी – सत्यं क्षान्तोऽयमपराधः, परं संन्यासिनो ब्रह्मचारिणः पण्डिताः, स्त्रियो बालाश्च न किमपि प्रष्टव्याः। आत्मानम् अपरिचाययन्तोऽपि प्रवेष्टव्याः।

दौवारिकः – संन्यासिन्! संन्यासिन्! बहूक्तम्, विरम न वयं दौवारिका ब्रह्मणोऽप्याज्ञां प्रतीक्षामहे, केवलं महाराजशिववीरस्याज्ञां वयं शिरसा वहामः। प्राह्णे महाराजस्य सन्ध्योपासनसमये भवादृशानां प्रवेशसमयो भवति, न तु रात्रौ।

(क) एकपदेन उत्तरत। (एक शब्द में उत्तर दीजिए।) : ½ × 2 = 1

(i) संन्यासिनं कठोरभाषणैः कः तिरस्करोति ? (ii) दौवारिकाः कस्य आज्ञां न प्रतीक्षन्ते ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए।) : 1

दौवारिकः कस्य आज्ञां शिरसा वहति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देश के अनुसार प्रश्नों के उत्तर दीजिए।) 1×3 = 3

(i) संन्यासी तुरीयाश्रमसेवी अत्र किं विशेषणपदम् ? (ii) रात्रौ इत्यत्र कतमा विभक्तिः ?

(iii) 'प्रतीक्षामहे' इति क्रियापदस्य प्रथम कर्तृपदं किम् ?

12. अधोलिखितं पद्यांशं पठित्वा प्रश्नान् उत्तरत। (नीचे लिखे पद्यांश को पढ़कर प्रश्नों के उत्तर दीजिए।):

यदि न सहसे राज्ञो मोहं धनुः स्पृश मा दयां
स्वजननिभृतः सर्वोऽप्येवं मृदुः परिभूयते।
अथ न रूचितं मुञ्च त्वं मामहं कृतनिश्चयो
युवतिरहितं लोकं कर्तुं यतश्छलिता वयम्।।

(क) एकपदेन उत्तरत। (एक पद में उत्तर दीजिए।) : ½ × 2 = 1

(i) स्वजननिभृतः कः परिभूयते ? (ii) अत्र कृतनिश्चयः कः अस्ति ?

(ख) पूर्णवाक्येन उत्तरत (पूर्णवाक्य में उत्तर दीजिए।) : 1

लक्ष्मणः लोकं किं कर्तुम् इच्छति ?

(ग) निर्देशानुसारं प्रश्नान् उत्तरत। (निर्देश के अनुसार प्रश्नों के उत्तर दीजिए।) 1×3 = 3

(i) 'शरासनम्' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?

(ii) 'अहं कृतनिश्चयः' अत्र किं विशेषणपदं प्रयुक्तम् ?

(iii) 'मृदुः परिभूयते' इत्यस्मिन् वाक्ये 'मृदुः' इति कर्तृपदस्य किं क्रियापदं प्रयुक्तम् ?

13. निर्देशानुसारं प्रश्नान् उत्तरत (निर्देश के अनुसार प्रश्नों के उत्तर दीजिए।) :

(क) जरामरणनाशार्थं प्रविष्टोऽस्मि तपोवनम्। 1+1 = 2

(i) इमां पंक्तिं कः कं प्रति कथयति ? (ii) सिद्धार्थः किमर्थं तपोवनं प्रविशति ?

(ख) स्वस्ति पन्थामनुचरेम सूर्याचन्द्रमसाविव। 1+1 = 2

(i) एष मन्त्रांशः कस्मात् ग्रन्थात् संकलिता ? (ii) अस्य मन्त्रांशस्य प्रथमं पदं लिखत ?

14. अधोप्रदत्त भावार्थत्रये शुद्धभावार्थस्य चयनं कृत्वा लिखत। 2+2 = 4

(नीचे लिखे गये क, ख खण्डों में प्रत्येक के तीन भावार्थों में से शुद्ध भावार्थ चयन करके लिखिए।)

(क) अतिथिदेवो भव।

**भावार्थः** (i) त्वम् अतिथये देवो भव।

(ii) त्वम् अतिथेः देवो भव।

(iii) त्वम् अतिथौ देवो भव।

(ख) शरीरेऽरिः प्रहरति हृदये स्वजनस्तथा।

**भावार्थः** (i) शत्रुः शरीरे प्रहरति किन्तु स्वजनः हृदये प्रहारं विदधाति।

(ii) शत्रुः हृदये तथा स्वजनः शरीरे प्रहरति।

(iii) शत्रुः तथा स्वजनः शरीरे प्रहरतः हृदयेन प्रहरतः।

**अथवा**

अधोदत्त श्लोकस्य प्रदत्तंभावार्थं मञ्जूषादत्तपदैः पूरयित्वा लिखत।

(नीचे दिए गये श्लोक के भावार्थ को मंजूषा में दिए गये पदों से पूर्ण कर के लिखिए।) : ½ ×8 = 4

वैवस्वतो मनुर्नाम माननीयो मनीषिणाम्।

आसीन्महीक्षितामाद्यः प्रणवश्छन्दसामिव।।

**भावार्थः**– इक्ष्वाकुवंशे (i) ............... पूज्यः (ii) ............ ओंकारः (iii) .............. महीपतीनां (iv) ............. राजा (v) ......................... मनु (vi) ................. (vii) ........................ (viii) .......................

| **मञ्जूषा** – विदुषां, इव, वेदानाम्, प्रथमः, वैतस्वतो, नामधेयः, विश्रुतः, अभूत् |
|---|

15. अधोलिखित श्लोक द्वयस्य प्रदत्तान्वये रिक्तस्थानपूर्तिं कृत्वा पुनः लिखत।

(नीचे दो श्लोकों का अन्वय दिया गया है, उनमें रिक्त स्थानों की पूर्ति करके अन्वय पुनः लिखिए।):

(क) यस्याः शक्रसमो भर्ता मया पुत्रवती च या।

फले कस्मिन् स्पृहा तस्या येनाकार्यं करिष्यति।। ½ ×4 = 2

**अन्वयः**– यस्याः (i).................. भर्ता (अस्ति)। याच मया (ii).................. (वर्तते)। तस्याः (iii).................. फले स्पृहा (भवेत्), येन सा (iv).................. करिष्यति।

(ख) अद्यापि यत्र सरल–प्रकृति–प्रणीतं

पञ्चोपचारमिव पूजनमस्ति मातुः। ½ ×4 = 2

**अन्वयः**– यत्र (i)........... सरल–प्रकृति–(ii)........... पञ्चोपचारम् (iii)............. मातुः (iv)............ अस्ति।

16. अधोलिखितानां 'अ' स्तम्भस्य वाक्यांशानां 'ब' स्तम्भस्य वाक्यांशैः सह उचितमेलनं कुरुत। (निम्नलिखित 'अ' स्तम्भ में प्रदत्त वाक्यांशों का 'ब' स्तम्भ में दिये गये वाक्यांशों के साथ उचित मिलान कीजिए।) 1×4 = 4

| **स्तम्भ 'अ'** | **स्तम्भ 'ब'** |
|---|---|
| (क) अग्ने नय सुपथा राये अस्मान् | (i) जगच्चक्षुषि भास्करे। |
| (ख) ततो मुहूर्ताभ्युदिते | (ii) विश्वानिदेव वयुनानि विद्वान। |
| (ग) वर्षाणि किल वस्तव्यं | (iii) न वेत्ति निर्गुणः। |
| (घ) गुणी गुणं वेत्ति | (iv) चतुर्दश वने त्वया। |

17. अधोलिखितेषु वाक्येषु रेखांकित पदानां प्रसंगानुसारम् उचितार्थ कोष्ठकात् चित्वा लिखता। 1×4 = 4
(निम्नलिखित वाक्यों में रेखांकित शब्दों के प्रसंगानुसार उचितार्थ कोष्ठकों से चुनकर लिखिए)।

(क) वने खलु वस्तव्यम्। (अरण्ये, नगरे, वस्त्ये)

(ख) शैशवेऽभ्यस्तविद्यानां। (शिशुत्वे, वार्धक्ये, कौमार्ये)

(ग) रुपं प्रसिद्धं न बुधास्तदाहु। (विशुद्धं, विख्यातं, विशिष्टं)

(घ) विभूषणं मौनमपण्डितानाम्। (भूषा, सौन्दर्यं, उपायनम्)

## खण्ड – 'घ' (संस्कृत साहित्य परिचयः भाग–II)

18. अधोलिखितानां कवीनां देशकाल कृतीनां यथानिर्देशं नामानि लिखत।
(निम्नलिखित कवियों के देश, समय और रचनाओं के नाम निर्देशानुसार लिखिए।) :

(क) कवयः 1×3 = 3

(i) भासः
(ii) रमाकान्त रथः
(iii) वेदकुमारी घई
} देशः

(ख) कवयः 1×3 = 3

(i) कालिदासः
(ii) अम्बिकादत्तव्यासः
(iii) गोविन्दचन्द्रउद्‌गाता
} कालः

(ग) कवयः 1×4 = 4

(i) अश्वघोषः
(ii) वल्लालसेनः
(iii) भर्तृहरिः
(iv) ईशदत्त शास्त्री
} काऽपि एका रचना

**अथवा**

(क) निम्न प्रदत्त वाक्येषु कोष्ठकेभ्यः चित्वा उचित शब्दैः रिक्त स्थान पूर्तिः क्रियताम्। 1×5 = 5
(निम्नलिखित वाक्यों में कोष्ठकों से चुनकर उचित शब्दों से रिक्त स्थानों की पूर्ति कीजिए।) :

(i) बुद्धचरितम् ....................... महाकाव्यम् अस्ति। (भासस्य, अश्वघोषस्य, कालिदासस्य)

(ii) प्रतिमानाटकस्य रचयिता ..................... अस्ति। (माघः, भारविः, भासः)

(iii) .................... कालिदासस्य महाकाव्येषु गण्यते। (रघुवंशं, नैषधं, रामायणं)

(iv) 'श्री राधा' इत्यस्य अनुवादकः .............. अस्ति। (श्री गोविन्द चन्द्र उद्‌गाता, रमाकान्तः, राधावल्लभः)

(v) कथासरित्सागरं .................................. प्रवर्तते। (कथाग्रन्थः, चम्पूकाव्यं, महाकाव्यं)

(ख) संस्कृत नाटकानां पञ्चविशेषताः लिखत। 5
(संस्कृत नाटकों की पाँच विशेषतायें लिखिये।)

*******